# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| कक्षा-आचार्य(SEM-१) (New) | प्रश्नपत्रम् – 4 | गुणाः –70 |
|---|---|---|
| विषयः – साहित्यम् | कोड –C.C.4.1.3 | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –12/10/2019 | सन्दर्भग्रन्थः – वासवदत्ता | |

### प्रथमान्वितिः (Unit 1)

गुणाः

**प्रश्न १ कस्याप्येकस्य श्लोकस्य व्याख्यां कुरुत।** ५

१ अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधारम्।
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला॥

२ सरस्वतीदत्तवरप्रसादः चक्रे सुबन्धुः सुजनैकबन्धुः।
प्रत्यक्षरश्लेषमयप्रबन्धं विन्यासवैदग्ध्यनिधिर्निबन्धम्॥

**प्रश्न २ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ ग्रन्थकर्तुः सुबन्धोः परिचयं यथाग्रन्थं लिखत।

२ सुबन्धोः गद्यशैलीं विवेचयत।

### द्वितीयान्वितिः (Unit 2)

**प्रश्न ३ कस्याप्येकस्य गद्यखण्डस्य ससन्दर्भं विवेचनं कुरुत।** ५

१ स रत्नाकरोऽनहिमयः, कथमगाधः समर्यादो नोद्रोकोऽप्यस्य विस्मयः सदा हिमकराश्रयोऽमृतमयः सत्पत्रस्तस्याचलो न क्रोधो महानदीनः समुद्रः।

२ येन च चन्द्रेणेव सकलकलाकुलगृहेण शर्वरीविहारिणा दलितकैरवेण प्रसाधिताशेन विलोकिता जलधय इव समुल्लसितगोत्राः सुदरविवर्धितजीवनाः प्रसन्नरुच्याः सन्नः परामृद्धिमवापुः।

**प्रश्न ४ अधः प्रदत्तयोः प्रश्नयोः कश्चिदेकः प्रश्नः विवर्ण्यः।** १०

१ राज्ञः चिन्तामणेः वर्णनं यथाग्रन्थं लिखत।

२ वासवदत्तायाः काव्यप्रकारं लक्षणानुसारं विवेचयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ कस्याप्येकस्य गद्यखण्डस्य सन्दर्भसहितं विवेचनं विधीयताम्।** ५

१ अथतां प्रीतिविस्तारितेन पिबन्निव चक्षुषा जनितेर्ष्ययेव निद्रया चिरसेवितया मुमुचे। विबुद्धस्तु विषरुरसीव दुर्जनवचसीव निमग्नमात्मानमवधारयितुं न शशाक।

२ वयस्य शृणुवस्तावदेतयोरालापमिति। ततः सारिका प्रकोपतरलाक्षरमुवाच। कितव शारिकानोरमन्विष्य समागतोऽसि कथमितरया रात्रिरियती तवेति। तच्छ्रुत्वा शुकस्तामब्रवीत्। भद्रेऽपूर्वा मया कथा श्रुता।

**प्रश्न ६ अधः प्रदत्तयोः कश्चिदेकं प्रश्नं विशदयत।** १०

१ कुसुमपुरनगरवर्णनं स्वशब्दैः विलिख्य तत्रस्थालङ्कारविवेचनमपि क्रियताम्।

२ भगवती भागीरथी वर्णनं विधाय तद्वर्णनवैशिष्ट्यं दर्शयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ कस्याप्येकस्य गद्यखण्डस्य विवेचनं कुरुत।** ५

१ सत्कविकाव्यबन्ध इवाबद्धतुहिनः , सत्पुरुष इव दोषानुबन्धरहितः , कैवर्त इव वद्धराजीवोत्पलमालः, समृद्धकासारशकुनिसार्थ इव निन्दितत्मरुबकः, खिङ्ग इवाम्लानसुभगो वसन्तकाल आजगाम।

२ अतिदूरप्रवृद्धेन मधुना जगति को वा न विक्रियते यदतिमुक्तोऽपि मुनिरपि विचकास। कुसुमसारस्य नवपूतशरमूलनिलीनमधुकरावलि पत्रेणेव रेजे।

**प्रश्न ८ अधः प्रदत्तयोः कश्चिदेकं प्रश्नं विशदयत।** १०

१ वसन्तवर्णनं यथाग्रन्थं विलिख्य तद्वर्णनगतं काव्यसौन्दर्यं विवेचयत।

२ सुबन्धोः "प्रत्यक्षरश्लेषमयप्रबन्धः" इति वसवदनामाश्रित्य यथार्थं विधीयताम्।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ प्रथमश्लोके कस्य देवस्य वन्दना कृता?
२ दामोदरः को देवः?
३ पार्थः इत्यस्य अर्थद्वयं किम्?
४ अस्याः कथायाः कः नायकः?
५ कन्दर्पकेतोः सखा कः आसीत्?
६ कः कन्दर्पकेतुमुपदिशति?
७ अपूर्वां कथां कः कथयति?
८ वेश्याजनेन अधिष्ठितस्य नगरस्य किं नाम आसीत्?
९ अष्टमूर्तिः कः भगवान् अस्ति?
१० कुसुमशरः नाम कः?
११ कैलासे केन निवासः क्रियते?
१२ रत्नाकरस्य अर्थः कः?
१३ "पावकोऽपि न कृष्णवार्मा" अत्र कः अलङ्कारः?
१४ नलस्य भार्यायाः नाम किमासीत्?
१५ चिन्तामणिः कस्य नाम आसीत्?